## चतुर्थ निकष 4.1.3

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयपरिसरे आरोग्यकेन्द्रं वित्तकोषः स्वचालितधनयन्त्रम् (ATM) पत्रालयः रङ्गमण्डपः महिलाकेन्द्रम्-परामर्शकेन्द्रम्-सांस्कृतिककार्यक्रमकेन्द्रम् इत्यादीनि पर्याप्तरूपेण उपलभ्यन्ते।

1. **आरोग्यकेन्द्रम् –** सम्पूर्णानन्दसंस्कृतविश्वविद्यालयपरिसरे सम्यक्सुष्ठुसंसाधनैः सुशोभितं स्वास्थ्यकेन्द्रमित्याख्यं 'आरोग्यकेन्द्रम्' अस्ति। 1958 ईस्वीये वर्षे अस्य संस्थापना जाता। 1966 ई0 वर्षे स्वास्थ्ययकेन्द्रस्य विस्तृतनवीनभवनस्य निर्माणमभवत्।

   भवनेऽस्मिन् छात्रछात्राकर्मचारीऽध्याापकानां तत्परिवारजनानां आतुराणाां चिकित्सार्थं रोगनिवारणार्थञ्च अनुभागद्वयस्यसंस्थापनंजातम् – आयुर्वेदानुभागः एलोपैथिकअनुभागश्च। द्वयोरनुभागयोचिकित्सककम्पाउण्डरपरिचारकानां (द्वयकम्पाउण्डरैकपरिचारकप्रत्येकानुभागे) व्यवस्थाऽस्ति। प्रत्येकानुभागे एकैकस्य चिकित्सकस्य व्यवस्थाऽस्ति।

   आरोग्यकेन्द्रस्यप्रत्येकानुभागे प्राथमिकोपचारस्य सुविधा उपलब्धाऽस्ति। प्रत्येकानुभागे स्नानागारेण सह शौचालयस्य सुविधाऽस्ति। पर्यङ्कासन्दि-ड्रेसिंगटेबुलसुशोभितमिदं आरोग्यकेन्द्रम् (स्वास्थ्य केन्द्रम्) अस्ति।

2. **वित्तकोषः (बैंक) –** सम्पूर्णानन्द संस्कृत विश्वविद्यालय परिसरे एव इण्डियनबैंकेत्याख्यः वित्तकोषः वर्तते। तत्रैव विश्वविद्यालयस्य वित्तसम्बन्धीसर्वंकर्मं प्रचलति। छात्राअध्यापका-कर्मचारिणः स्वीय वित्तकोष (बैंक) सम्बन्धी कार्याणि सम्पादयन्ति। वित्तकोषस्याधिकारीणः कर्मचारिणश्च यथावसरे वित्तविषयकमार्गदर्शनं कार्यसम्पादनञ्च कुर्वन्ति।

3. **स्वचालितधनयन्त्रम् (ए.टी.एम.) –** सम्पूर्णानन्दसंस्कृतविश्वविद्यालयपरिसरस्य स्थिते इण्डियनबैंकपरिसरे स्वचालितधनयन्त्रस्य संस्थापनं कृतं वर्तते। तत्र गत्वा छात्रा-अध्यापक-अधिकारी कर्मचारी-आदिसम्पूर्णविश्वविद्यालयपरिसरः तथा वाह्याजना अपि तत्रतः स्वचालितधन्यन्त्रतः स्वीयेन ए.टी.एम. माध्मेन यथेच्छानुसारं धनानि रूप्यकाणि वा प्राप्नुवन्ति। सुष्ठुशोभन ए.टी.एम. व्यवस्था अत्र वर्तते।

4. **डाकघरम् (Post Office) –** संस्कृतविश्वविद्यालयपरिसरे एवं सुशोभितं सुसज्जितं कर्मकरैर्सम्यक्परिपूर्णञ्च एकं डाकघरं विद्यते। तत्रैव गत्वा छात्राध्यापकाधिकारीकर्मचारीजनाः डाकघरस्य लाभं प्राप्नुवन्ति। प्रतिदिनं डाकघरस्यैकः पत्रवितरकर्मकारः पत्राणि वितरन्ति।

5. **रङ्गमण्डपम् –** सम्पूर्णानन्द संस्कृत विश्वविद्यालयपरिसरस्योत्तरपार्श्वे एकं सुन्दरं सुशोभनं सुव्यवस्थितं रङ्गमण्डपम्। अनेकोत्सवावसरेषु विभिन्नसंस्कृतनाटकानां तत्र प्रदर्शन मञ्चनञ्च भवति। 2023 ई0वर्षे विश्वविद्यालय संस्थापनामहोत्सवावसरे अभिज्ञानशाकुन्तलस्य मञ्चनं प्रदर्शनञ्चऽभवत्। नाट्यप्रदर्शनाभ्यासेन रसास्विादनेन च छात्राणामन्येषाञ्च ज्ञानप्रतिभाकर्मठताकर्तव्यनिष्ठादिरूपरामादिवत्

वर्तितव्यं न च रावणादिवत् इत्यादि सूक्त्यर्थस्य परममोदरूपनाट्य प्रयोजनस्य विकासो भवति। रसास्वादोऽपि जायते।

6. **महिला केन्द्रम् -** छात्राणां समस्या-बाधा-डिप्रेशनादि निवारणाय तासां मार्गप्रकाशनाय प्रशस्तकरणाय च परिसरस्य पाणिनिभवने एकं महिलाकेन्द्रमस्ति। तत्र, महिलाछात्राणां समस्या निवारणं कनुमस्ति। तत्र, महिला छात्राणां समस्या निवारणं यथोचितमार्गनिर्देशनञ्च भवति। अस्य महिला केन्द्रस्य निर्देशिका अध्यक्षा वा प्रो0 विधुद्विवेदीमहोदया गृहविज्ञानस्याध्यापिका आचार्याः अस्ति।
7. **परामर्शकेन्द्रम् –** छात्रकल्याणसंकायाध्यक्षकार्यालयैव परामर्शकेन्द्रमस्ति। तत्रैव छात्राणां समुचितमार्गदर्शनं छात्रकल्याण संकायाध्यक्ष-सहायकछात्रकल्याण संकायध्यक्षैश्च क्रियते।
8. **सांस्कृतिककार्यक्रमकेन्द्रम् –** सम्पूर्णानन्दसंस्कृतविश्वविद्यालयपरिसरे एव विविध सांस्कृतिककार्यक्रमाणामायोजनं भवति। नाट्यमञ्चनं नाट्यशालायाम् संगीतगीतक्रमाणायोजनं पाणिनिसभागारशताब्दीभवनसभागारे शिक्षाविभागसभागारे राष्ट्रियसेवायोजनान्तर्गते एन.सी.सी. परिसरे छात्रसंघभवने च भवति। यथेष्टमनोरञ्जना साधनस्य व्यवस्था वर्तते।
9. **यौनउत्पीड़न निवारण केन्द्रमस्ति-** सम्पूर्णानन्द संस्कृतविश्वविद्यालय परिसरे यौनउत्पीड़न विवरण केन्द्रमस्ति। अस्या ध्याक्षाः प्रो॰ विधु द्विवेदी महोदय सन्ति।